"भुक्तोच्छिष्टस्तथाचान्तश्चाण्डालैः श्वपचेन वा ।
प्रमादात् स्पर्शनं गच्छेत् तत्र कुर्य्याद्विशोधनम् ॥
गायत्र्यष्टसहस्रन्तु द्रुपदां वा शतं जपेत् ॥"
इत्याह्निकाचारतत्त्वम् ॥

द्रुमः, पुं, (समुदाये वृत्ताः शब्दा अवयवेष्वपि वर्त्तन्ते इति न्यायात् द्रुः शाखा विद्यतेऽस्य । "द्युद्रुभ्यां मः ।" ५ । २ । १०८ । इति मः ।) वृक्षः । इत्यमरः । २ । ४ । ५ ॥ (यथा, मनुः । ८ । २५५ ।
"निर्भयन्तु भवेद्यस्य राष्ट्रं बाहुबलाश्रितम् ।
तस्य तद्वर्द्धते नित्यं सिच्यमान इव द्रुमः ॥")
पारिजातः । कुवेरः । इति मेदिनी । मे, १५ ॥ (स्वनामख्यातः किम्पुरुषेश्वरः । यथा, महाभारते । २ । १० । २८ ।
"द्रुमः किम्पुरुषेशश्च उपास्ते धनदेश्वरम् ॥"
स्वनामख्यातनृपविशेषः । स तु शिविनामदैत्यस्यांशात् जातः । यथा, तत्रैव ।१।६७।८ ।
"यस्तु राजन् ! शिविर्नाम दैतेयः परिकीर्त्तितः ।
द्रुम इत्यभिविख्यातः स आसीद्भुवि पार्थिवः ॥"
रुक्मिणीगर्भजातः कृष्णस्य पुत्त्रविशेषः । यथा, हरिवंशे । १६० । ६ ।
"चारुभद्रश्चारुगर्भः सुदंष्ट्रो द्रुम एव च ॥")

द्रुमनखः, पुं, (द्रुमस्य नख इव ।) कण्टकम् । इति हारावली ॥

द्रुमरः, पुं, (द्रुम्रियतेऽनेनेति । मृ + करणे अप् ।) कण्टकम् । इति हारावली । ६१ ॥

द्रुमव्याधिः, पुं, (द्रुमस्य व्याधिरिव ।) लाक्षा । इति राजनिर्घण्टः ॥

द्रुमशीर्षं, क्ली, (द्रुमस्य शीर्षमिव शीर्षं यस्य ।) कुट्टिमभेदः । यथा,—
"कपिशीर्षं द्रुमशीर्षं तथा चाखोटशीर्षकम् ।
इति कुट्टिमभेदाः स्युः शाब्दिकैः समुदाहृताः ॥"
इति शब्दरत्नावली ॥
(द्रुमस्य शीर्षम् इति विग्रहे वृक्षाग्रम् ॥)

द्रुमश्रेष्ठः, पुं, (द्रुमेषु तृणद्रुमेषु श्रेष्ठः ।) तालवृक्षः । इति शब्दार्थकल्पतरुः ॥ वृक्षश्रेष्ठश्च ॥

द्रुमामयः, पुं, (द्रुमस्य आमयो व्याधिः ।) लाक्षा । इत्यमरः । २ । ६ । १२५ ॥

द्रुमारिः, पुं, (द्रुमस्य अरिः । वृक्षनाशकत्वात् तथात्वम् ।) हस्ती । इति राजनिर्घण्टः ॥

द्रुमाश्रयः, पुं, (द्रुमः आश्रयो यस्य ।) सरटः । इति राजनिर्घण्टः ॥ वृक्षाश्रितमात्रेषु, त्रि ॥

द्रुमेश्वरः, पुं, (द्रुमेषु ईश्वरः श्रेष्ठः ।) तालवृक्षः । इति शब्दार्थकल्पतरुः ॥ (द्रुमाणां ओषधीनामीश्वरः ।) चन्द्रः । इति हरिवंशः ॥

द्रुमोत्पलः, पुं, (द्रुमे उत्पलमिव पुष्पं यस्य ।) कर्णिकारवृक्षः । इत्यमरः । २ । ४ । ६० ॥

द्रुवयं, क्ली, (द्रोर्वृक्षस्य विकारभूतं प्रस्थादिपरिमाणम् । द्रु + "माने वयः ।" ४ । ३ । १६२ । इति वयः ।) परिमाणम् । इत्यमरः ।२।६।८५॥ (पुंलिङ्गेऽपि । यथा, अथर्ववेदे । ५ । २० । २ ।
"सिंह इवास्तानीद्द्रुवयो विबद्धः ॥")

द्रुसल्लकः, पुं, (द्रुषु सल्लक इव ।) पियालवृक्षः । इति शब्दरत्नावली ॥

द्रुह, ल्ल य ज जिघांसे । इति कविकल्पद्रुमः ॥ (दिवां-परं-अकं-वेट् ।) जिघांस इहानिष्टाचरणमिति विद्यानिवासः । ल्ल, अद्रुहत् । य, द्रुह्यति खलः साधवे । ज, द्रोहिष्यति ध्रोक्ष्यति । इति दुर्गादासः ॥

द्रुहः, पुं, (द्रुह्यति धनादिलाभाशया पितृविनाशं चिन्तयतीति । द्रुह + "इगुपधज्ञेति ।" ३ । १ । १३५ । इति कः ।) पुत्त्रः । इति शब्दार्थकल्पतरुः ॥ (द्रोहकारके, त्रि । यथा, ऋग्वेदे । ७ । १०४ । १७ ।
"नक्तमप द्रुहा तन्वं गूहमाना ।"
"या राक्षसी नक्तं रात्रौ द्रुहा द्रोहेन युक्ता ।" इति तद्भाष्ये सायनः ॥)

द्रुहणः, पुं,(द्रुं संसारगतिं हन्तीति । हन् + अप् । "पूर्व्वपदात् संज्ञायामगः ।" ८ । ४ । ३ । इति णत्वम् ।) ब्रह्मा । इति भरतद्विरूपकोषः ॥

द्रुहिणः, पुं, (द्रुह्यति दुष्टेभ्य इति । द्रुह + "बहुलमन्यत्रापि ।" उणां २ । ४९ । इति इनन् । गुणाभावश्च ।) ब्रह्मा । इत्यमरः । १ । १ ।१७ ॥ (यथा, देवीभागवते । १ । ८ । २८ ।
"द्रुहिणे सृष्टिशक्तिश्च हरौ पालनशक्तिता ॥")

द्रुही, स्त्री, (द्रुह्यति पित्रे विवाहकालीनधनव्ययादिना । द्रुह + कः । ततो ङीष् ।) दुहिता । इति शब्दार्थकल्पतरुः ॥

द्रू, ग ञ ञ वधे गतौ । इति कविकल्पद्रुमः ॥ (स्वां-क्र्यां च-उभं-सकं-सेट् ।) ग ञ, द्रूणोति द्रूणुते । ग ञ, द्रूणाति द्रूणीते । इति दुर्गादासः ॥

द्रूः, पुं, (द्रवति स्रवतीति । द्रु + "क्विप् वचिप्रच्छीति ।" उणां २।५७। इति क्विप् दीर्घश्च ।) स्वर्णम् । इति सिद्धान्तकौमुद्यामुणादिवृत्तिः ॥

द्रूघणः, पुं, (द्रुघणः । पृषोदरादित्वात् दीर्घः ।) द्रुघणः । इति भरतद्विरूपकोषः संक्षिप्तसारश्च ॥

द्रूणः, पुं, (द्रुणः । पृषोदरादित्वात् दीर्घः ।) द्रुणः । वृश्चिकः । इति शब्दार्थकल्पतरुः ॥

द्रेक, ऋ ङ स्वनोत्साहे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) तवर्गतृतीयादिः । रेफयुक्तः । शब्दार्थौ । उत्साहो वृद्धिरिति चन्द्रः । औन्नत्यमिति क्षीरस्वामी । ऋ, अदिद्रेकत् । ङ, द्रेकते लोकः शब्दायते उत्सहते वेत्यर्थः । स्वनेनोत्साहः स्वनोत्साहः । इति केचित् । तन्मते शब्देनोत्सहते इत्यर्थः । इति दुर्गादासः ॥

द्रेक्काः, द्रेक्काणः, पुं, लग्नतृतीयभागैकभागः । यथा, ज्योतिस्तत्त्वे ।
"स्वपञ्चनवमानां ये राशीनामधिपा ग्रहाः ।
ते द्रेक्काणाधिपा ज्ञेया द्रेक्काणाख्यय एव हि ॥"

द्रै, स्वप्ने । इति कविकल्पद्रुमः ॥ (भ्वां-परं-अकं-अनिट् ।) द्रायति । इति दुर्गादासः ॥

द्रोणः, पुं, क्ली, (द्रवतीति । द्रु गतौ + "कृवृजृषिद्रुपन्यनिस्वपिभ्यो नित् ।" उणां ३ । १० । इति नः ।) आढ़कपरिमाणम् । आढ़कचतुष्टयम् । इति शब्दरत्नावली ॥ ३२ शेर इति लौकिकमानम् । तत्पर्य्यायः । घटः २ कलसः ३ उन्मानम् ४ लङ्वणः ५ अर्म्मणः ६ । इति वैद्यकपरिभाषा ॥ "द्रोणस्तु खार्य्याः खलु षोड़शांशः ।" इति लीलावती ॥ (अरणीकाष्ठम् । यथा, ऋग्वेदे । ६ । २ । ८ ।
"क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः ।"
"हे अग्ने क्रत्वा कर्म्मणा मन्थनरूपेण द्रोणे द्रुमे काष्ठेऽरण्यां विद्यमानस्त्वमज्यसे हि ।" इति तद्भाष्ये सायनः ॥ काष्ठनिर्म्मितकलशः । यथा, तत्रैव । ६ । ३७ । २ ।
"प्रो द्रोणे हरयः कर्म्माग्मन् पुनानास ऋज्यन्तो अभूवन् ॥"
"द्रोणे द्रोणकलशे ऋज्यन्त ऋजु गच्छन्तोऽभूवन् ।" इति सायनः ॥ द्रुममयरथः । इति निरुक्तम् । ५ । २६ ॥ यथा, ऋग्वेदे ।६।४४।२०।
"आ ते वृषन् वृषणो द्रोणमस्थुः ।"
"द्रोणं द्रुममयं रथमस्थुः ।" इति सायनः ॥)

द्रोणः, पुं, (द्रोणः कलस उत्पत्तिस्थानत्वेनास्त्यस्य । द्रोण + अच् ।) द्रोणाचार्य्यः । (अयं कुरुपाण्डवानां आचार्य्यः । अस्य पिता भरद्वाजः । अस्य जन्मवृत्तान्तं यदुक्तं महाभारते । १ । १३१ । ६-१६ ।
"गङ्गाद्वारं प्रति महान् बभूव भगवानृषिः ।
भरद्वाज इति ख्यातः सततं संशितव्रतः ॥
सोऽभिषेक्तुं ततो गङ्गां पूर्व्वमेवागमन्नदीम् ।
महर्षिभिर्भरद्वाजो हविर्द्धाने चरन् पुरा ॥
ददर्शाप्सरसं साक्षात् घृताचीमाप्लुतामृषिः ।
रूपयौवनसम्पन्नां मदहृप्तां मदालसाम् ॥
तस्याः पुनर्नदीतीरे वसनं पर्य्यवर्त्तत ।
व्यपकृष्टाम्बरां दृष्ट्वा तामृषिश्चकमे ततः ॥
तत्र संसक्तमनसो भरद्वाजस्य धीमतः ।
ततोऽस्य रेतश्चस्कन्द तदृषिर्द्रोण आदधे ॥
ततः समभवद्द्रोणः कलसे तस्य धीमतः ।
अध्यगीष्ट स वेदांश्च वेदाङ्गानि च सर्व्वशः ॥
अग्निवेशं महाभागं भरद्वाजः प्रतापवान् ।
प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदांवरः ॥
अग्नेस्तु जातः स मुनिस्ततो भरतसत्तम ! ।
भारद्वाजं तदाग्नेयं महास्त्रं प्रत्यपादयत् ॥"
अस्य पत्नी कृपाचार्य्यभगिनी कृपी पुत्त्रस्तु अश्वत्थामा । अयं हि भारतयुद्धे दुर्य्योधनस्य पक्षमवलम्ब्य पञ्चदशदिनं यावत् युद्धमकरोत् । तत्र पूर्व्वं दशदिनं भीष्मदेवस्याधीनत्वेन स्थित्वा पश्चादस्य शरशय्याग्रहणानन्तरं एकादशदिनात् स्वयं सेनापतिरभवत् । तत एनं अधर्म्मयुद्धनिरतं दृष्ट्वा ऋषयः समागत्य सम्प्राप्तं स्वर्गे कालं विज्ञापयामास । यथा, महाभारते । ७ । १९० । ४६-५२ ।
"त एनमब्रुवन् सर्व्वे द्रोणमाहवशोभिनम् ।
अधर्म्मतः कृतं युद्धं समयो निधनस्य ते ॥
न्यस्यायुधं रणे द्रोण ! समेत्यास्मानवस्थितान् ।
नातः क्रूरतरं कर्म्म पुनः कर्त्तुमिहार्हसि ॥"